"दैवकार्य्यादिजातीनां पितृकार्य्यं विशिष्यते ।
दैवं हि पितृकार्य्यस्य पूर्व्वमाप्यायनं स्मृतं" ॥)

आप्यायितः, त्रि, (आङ् + प्याय् + णिच् + क्तः ।) तृप्तः । प्रीतः । वर्द्धितः । यथा,—
"एषा सूर्य्यस्य वीर्य्येण सोमस्याप्यायिता तनुः ।
पौर्णमास्यां स दृश्येत सम्पूर्णो दिवसक्रमात्" ॥
इति कौर्म्मे ४० अध्यायः ॥ आनन्दितः । इति लोकप्रसिद्धं ॥ (यथा हितोपदेशे ।
"आप्यायितोऽहं भवतामनेन वचनामृतेन" ॥)

आप्रच्छन्नं,क्ली, (आङ् + प्रच्छ + ल्युट् ।) गमनागमनादिसमये सुहृदादेरालिङ्गनारोग्यप्रश्नस्वागतादिनानन्दनं । इत्यमरः ॥

आप्रच्छन्नं, क्ली, (आङ् + प्र + छद् + क्त ।) आप्रच्छनं । तत्पर्य्यायः । आनन्दनं २ सभाजनं ३ ॥ इति हेमचन्द्रः ॥ [ग्रपर्य्यन्तं ॥

आप्रपदं, क्ली, (प्रपदं पादाग्रं । तत्पर्य्यन्तं ।) पादा-

आप्रपदीनं, त्रि, (आप्रपदं पदाग्रान्तं व्याप्नोतीति । आङ् + प्र + पद + ख ।) पादाग्रपर्य्यन्तपतितवस्त्रादि । इत्यमरः ॥ ('आप्रपदीनां कण्ठे यमदोलामिव गुणकुसममालामाख्ढाम्" । इति हर्षचरिते ५म उच्छ्वासः ।)

आप्लवः, पुं, (आङ् + प्लु + अप् ।) स्नानं । इत्यमरः ॥

आप्लवव्रती, [न्] पुं, (आप्लवते प्लुङ् + अच्, आप्लवस्वासौ व्रती च । आप्लवः स्नानं तत्र व्रती नित्यस्नायीति मुकुटः ।) आप्लुतव्रती । स्नातकब्राह्मणः । इत्यमरटीकायां भरतः ॥

आप्लावः, पुं, (आङ् + प्लुङ् + घञ् । जलप्रक्षेपः, जलसेचनं, जलमध्ये सम्यगवगाहनं, जलप्लावनं, जलानां सर्व्वतः समुच्चलनं ।) स्नानं । इत्यमरः ॥

आप्लुतः,पुं, (आङ् + प्लुङ् + क्तः ।) आप्लुतव्रती । स्नातकः । इति मेदिनी ॥

आप्लुतः,त्रि, (आङ् + प्लु + क्त ।) स्नातः । कृतस्नानः । इति मेदिनी ॥ (आप्लुतः सर्व्वपापेभ्यः स गङ्गायां प्रमुच्यत । इति भारते ।) स्नाने क्ली इति हेमचन्द्रः ॥ (आर्द्रीकृतः । सिक्तः । पञ्चतन्त्रे,—
"अन्ये जर्ज्जरितकलेवरा रुधिराप्लुताः" । इति)

आप्लुतव्रती, [न्] पुं, (आप्लुतस्य स्नातकस्य व्रतमस्यास्तीति । आप्लुतव्रत + इनि ।) समाप्तवेदाध्ययनस्नानशीलः । ब्रह्मचर्य्यं त्यक्त्वा यो गृहाश्रमं गतः सः । समाप्तवेदाध्ययनो यः स्नानशील आश्रमान्तरं न गतः सोऽपि । आप्लुतं स्नानं तत्र व्रती नित्यस्नायी इति व्युत्पत्तिः । इत्यमरटीकायां भरतः ॥

आप्व, [न्] पुं, (आप् + वुन् ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आपूकं, क्ली, अपूपं । इति वैद्यकं ॥ आपिं इति भाषा । (अस्य गुणानाह । भावप्रकाशे ॥
"आपूकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलं" ।)

आबद्धः, पुं, (आङ् + बन्ध + क्तः ।) दृढ़बन्धनं । प्रेम । अलङ्कारः । इति विश्वमेदिन्यौ ॥ (यथा मेघदूते९ ।
"गर्भाधानक्षणपरिचयान्नूनमाबद्धमाला" ॥)
योत्रं । इति मेदिनी ॥

आबन्धः, पुं, (आबध्यतेऽनेन आङ् + बन्ध + घञ् ।) योत्रं । इत्यमरहेमचन्द्रौ ॥ योत्दड़ी इति भाषा । भूषणं । प्रेम । बन्धनं । इति हेमचन्द्रः ॥ (यथा अमरुशतके । ३८ ॥
"गते प्रेमाबन्धे प्रणयबहुमाने विगलिते" ।)

आबलिः,स्त्री, आलिः । श्रेणी । इत्यमरः ॥ (समूहः, आवली ।)

आबिद्धः, त्रि, (आङ् + व्यध् + क्तः ।) वक्रः । क्षिप्तः । इत्यमरः । पराहतः । इति मेदिनी ॥ मूर्खः । इति शब्दरत्नावली ॥

आबिधः, पुं, वेधनास्त्रं । इत्यमरः ॥ भोमर तुरपन इत्यादि भाषा ।

आबिलः, त्रि, (आ + बिल + क ।) अनच्छः । अनिर्म्मलः । इत्यमरः ॥

आबिलकन्दः, पुं, मालाकन्दः । इति राजनिर्घण्टः ॥

आबुत्तः, पुं, (आप् + क्विप् + आपमुत्तनोति । अन्येभ्योपीति ड ।) नाट्योक्तौ भगिनीपतिः । इत्यमरः ॥

आभरणं,क्ली. (आभ्रियतेऽनेन । भृञ भरणे । ल्युट् ।) भूषणं । अलङ्कारः । इत्यमरः ॥ (तच्चतुर्व्विधं, आवेध्यं बन्धनीयं, क्षेप्यं, आरोप्यं चेति । तत्र आवेध्यं कुण्डलादि, बन्धनीयं कुसुमादिकं, क्षेप्यं नूपुरादिकं, आरोप्यं हारादि । यदुक्तं,—
"स्याद्भूषणं त्वाभरणं चतुर्धा परिकीर्त्तितं ।
आवेध्यं बन्धनीयञ्च क्षेप्यमारोप्यमेव तत्" ॥
(यथा मनुः, ७।२२२ ।
"वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च" ।
यथा कुमारसम्भवे । ५ । ४४ ॥
"किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्द्धकशोभि वल्कलं" ॥)

आभा, स्त्री, (आङ् + भा + अङ् + टाप् ।) शोभा कान्तिः । इति हेमचन्द्रः ॥ दीप्तिः । ज्योतिः ॥ (वातरोगभेदः । ववुले । यथा भावप्रकाशे वातव्याधौ त्रिकशूलचिकित्सा,—
"आभा ववुलपर्य्यायः कथितः कोविदैरिह" ।)

आभातिः, स्त्री, (आङ् + भा + क्तिन् दीप्तिः, ज्योतिः ।) छाया । इति राजनिर्घण्टः ॥

आभाषणं, क्ली, (आङ् + भाष् + ल्युट् ।) आलापः । कथनं । इत्यमरः ॥ (यथा रघुवंशे । २ । ५८ ॥
"सम्बन्धमाभाषणपूर्व्वमाहुः" ।)

आभासः, पुं, (आङ् + भास् + पचाद्यच् ।) सदृशः । प्रतिविम्बं । इति वेदान्तः ॥ दीप्तिः । अभिप्रायः ॥ (प्रतिविम्बादिवदवास्तवस्वरूपमविद्याकार्य्यं, मृषाबुद्धिः । यथा अध्यात्मरामायणे,—
"आभासस्तु मृषाबुद्धिरविद्याकार्य्यमुच्यते ।
अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पतः ॥
आभासत्वपरं विम्बभूतमेवं त्रिधा चितिः ।
साभासबुद्धेः कर्त्तृत्वमविच्छिन्ने विकारिणि" ॥
तथा च पञ्चदश्यां ६—७ ।
"चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः ।
पृथक् पृथक् चिदाभासश्चैतन्याध्यस्तदेहिनां ॥
कल्प्यन्ते जीवनामानो बहुधा संसरन्त्यमी ।
वस्त्राभासे स्थितान् वर्णान् यद्वदाधारवस्त्रगान्" ॥)

आभास्वरः,पुं, (आङ् + भास् + वरच् ।) चतुःषष्टिसंख्यकगणदेवताविशेषः । इत्यमरः ॥ (यदुक्तं, आभास्वराश्चतुःषष्टि । यद्वा,—
"आत्मा ज्ञाता दमो दान्तः शान्तिर्ज्ञानं शमस्तपः ।
कामः क्रोधो मदो मोहो द्वादशाभास्वरा इमे" ॥)

आभिजनः,पुं, (अभिजनादागतः । अभिजन + अण् ।) अभिजनस्य भावः । कुलसम्बन्धीयः । गाँइ पदवी इत्यादि भाषा ॥ (यथा कुमारसम्भवे, १।२६ ।
"तां पार्व्वतीत्याभिजनेन नाम्ना
बन्धुप्रियां बन्धुजनो जुहाव" ॥)

आभिजात्यं,क्ली, (अभिजात + ष्यञ् ।) अभिजातस्य भावः । कौलिन्यं । पाण्डित्यं ॥ (महावंशजननजनितमर्य्यादा । यथा रामायणे,—
"आभिजात्यं हि ते मन्ये यथा मातुस्तथैव च" ॥)

आभिधा,स्त्री, (अभि + धा + अङ् + टाप् ।) शब्दः । इति शब्दरत्नावली ॥

आभिधानकं,क्ली, (अभिधा + तक् + अच् ।) शब्दः । इति शब्दरत्नावली ॥

आभिरूप्यं, क्ली, (अभिरूप + ष्यञ् ।) अभिरूपस्य भावः । यथा,—
"अर्च्चकस्य तपोयोगादर्च्चनस्यातिशायनात् ।
आभिरूप्याच्च विम्बानां देवः सान्निध्यमृच्छति" ॥
इति तिथ्यादितत्त्वधृतहयशीर्षपञ्चरात्रीयवचनं ॥

आभीरः, पुं, (आ समन्तात् भियं राति । रा दाने आत इति कः ।) गोपः । इत्यमरः ॥ आहिर इति भाषा । स च ब्राह्मणादम्बष्ठायां जातः । इति मनुः ॥

आभीरपल्लिः, स्त्री, (आभीराणां पल्लिः ।) गोपपल्ली । इत्यमरटीकायां रायमुकुटः ॥ गोयालापाड़ा इति भाषा ॥

आभीरपल्ली, स्त्री, (आभीराणां पल्ली ।) गोपगृहसमूहः । गोपग्रामः । गोपगृहं । गोपस्थानं । तत्पर्य्यायः । घोषः २ । इत्यमरः ॥

आभीरी, स्त्री, (आभीरपुंयोगादितिजातेरिति च ङीष् ।) गोपस्त्रीजातिः । गोपपत्नी । तत्पर्य्यायः । महाशूद्री २ । इत्यमरः ॥ आहिरिणी इति भाषा ॥

आभीलं, क्ली, (आ समन्तात् भियं लाति जनयति । आङ् + भी + ला + क ।) कष्टं । कृच्छ्रं । इत्यमरः ॥ (भयावहः, भीतिजनकः । यथा मेदिनी,—
"आभीलं न द्वयोः कृच्छ्रे वाच्यलिङ्गं भयानके" ॥
यथा महाभारते,—
"रात्रौ निशीथे स्वाभीले गतेऽर्द्धसमये नृप ।
प्रचारे पुरुषादानां रक्षसां घोरकर्म्मणाम्" ॥)

आभीलः, त्रि, (आङ् + भी + ला + क ।) कष्टयुक्तः । इत्यमरः ॥ भयानकः । इति मेदिनी ॥

आभीक्ष्णं, क्ली, (अभीक्ष्ण + ष्यञ् ।) पुनर्थः । नित्यं । तद्युक्तक्रियायां त्रि । इति शब्दरत्नावली ॥

आभेरी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥

आभोगः, पुं, (आङ् + भुज + घञ् ।) परिपूर्णता । इत्यमरः ॥ (यथा मेघदूते, उत्तरमेघे २१ ।
"गण्डाभोगात्कठिनविषमामेकवेणीं करेण" ।